# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री गीत गोविंद॥



### ॥ दशमः सर्गः॥(चतुश्चतुर्भुजः)

(वसंततिलकावृत्तम्)

अत्रान्तरे मसृणरोषवशामपार-

निः(श्)श्वासनिः(स्)सहमुखीं(म्) समुपेत्य राधां(म्) ।

सव्रीडमीक्षितसखीवदनां(न्) दिनान्ते

सानन्दगद्गदमिदं(म्) हरिरित्युवाच ॥ 1॥

### ॥ गीतम् 19 ॥

(अथ एकोनविं(म्)शः(फ्) प्रबन्धो देशवराडिरागेण अष्टताले गीयते)

वदसि यदि किं(ञ्)चिदपि दन्तरुचिकौमुदी

हरति दरतिमिरमतिघोरम् ।

स्फुरदधरसीधवे तव वदनचन्द्रमा

रोचयति लोचनचकोरम् ॥

प्रिये चारुशीले प्रिये चारुशीले

मुञ्च मयि मानमनिदानं(म्) ।

सपदि मदनानलो दहति मम मानसं(न्)

देहि मुखकमलमधुपानम् ॥ 1॥

सत्यमेवासि यदि सुदति मयि कोपिनी
देहि खरनखरशरघातम् ।
घटय भुजबन्धनं(ञ्) जनय रदखण्डनं(यँ)
येन वा भवति सुखजातम् ॥ 2॥ प्रिये चारुशीले

त्वमसि मम भूषणं(न्) त्वमसि मम जीवनं(न्)
त्वमसि मम भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नम् ॥ 3॥ प्रिये चारुशीले

नीलनलिनाभमपि तन्वि तव लोचनं(न्)
धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि
कृष्णमिदमेतदनुरूपम् ॥ 4॥ प्रिये चारुशीले

स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु तव हृदयदेशम् ।
रसतु रशनापि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम् ॥ 5॥ प्रिये चारुशीले

स्थलकमलगञ्जनं(म्) मम हृदयरञ्जनं(ञ्)
जनितरतिरङ्गपरभागम् ।
भण मसृणवाणि करवाणि चरणद्वयं(म्)
सरसलसदलक्तकरागम् ॥ 6॥ प्रिये चारुशीले

स्मरगरलखण्डनं(म्) मम शिरसि मण्डनं(न्)
देहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकदनारुणो
हरतु तदुपाहितविकारम् ॥ 7॥ प्रिये चारुशीले

इति चटुलचाटुपटुचारु मुरवैरिणो
राधिकामधि वचनजातम् ।
जयति पद्मावतीरमणजयदेवकवि-
भारतीभणितमितिगीतम् ॥ 8॥ प्रिये चारुशीले

(हरिणी)
परिहर कृतातङ्के शङ्कां(न्) त्वया सततं(ङ्) घन-
स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि ।
विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं(म्)
स्तनभरपरीरम्भारम्भे विधेहि विधेयताम् ॥ 1॥

(वसंततिलकावृत्तम्)

मुग्धे विधेहि मयि निर्दयदन्तदं(म्)श-
दोर्वल्लिबन्धनिबिडस्तनपीडनानि ।
चण्डि त्वमेव मुदमुद्वह पञ्चबाण-
चण्डालकाण्डदलनादसवः(फ्) प्रयान्ति ॥ 2॥

(जगती)

शशिमुखि तव भाति भङ्गुरभ्रू-
युवजनमोहकरालकालसर्पी।
तदुदितभयभञ्जनाय यूनां(न्),
त्वदधरसीधुसुधैव सिद्धमन्त्रः ॥ 3॥

(हरिणी)

व्यथयति वृथा मौनं(न्) तन्वि प्रपञ्चय पञ्चमं(न्)
तरुणि मधुरालापैस्तापं(वँ) विनोदय दृष्टिभिः ।
सुमुखि विमुखीभावं(न्) तावद्विमुञ्च न मुञ्चमां(म्)
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः ॥ 4॥

(शार्दूलविक्रीडितेन)

बन्धूकद्युतिबान्धवोऽयमधरः(स्) स्निग्धो मधूकच्छविर्-
गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं(लँ) लोचनम् ।
नासाभ्येति तिलप्रसूनपदवीं(ङ्) कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं(म्) स पुष्पायुधः ॥ 5॥

दृशौ तव मदालसे वदनमिन्दुसन्दीपनं(ङ्)

गतिर्जनमनोरमा विधुतरम्भमूरुद्वयम् ।

रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-

वहो विबुधयौवनं(वँ) वहसि तन्वि पृथ्वीगता ॥ 6॥

(शार्दूलविक्रीडितेन)

स प्रीतिं(न्) तनुतां(म्) हरिः(ख्) कुवलयापीडेन सार्धं(म्) रणे

राधापीनपयोधरस्मरणकृत्कुम्भेन सम्भेदवान् ।

पत्रे बिभ्यति मीलति क्षणमपि क्षिप्रं(न्) तदालोकनाद्-

व्यामोहेन जितं(ञ्) जितं(ञ्) जितमिति व्यालोलकोलाहलः ॥ 7॥

॥ इति श्रीगीतगोविन्दे मानिनीवर्णने चतुश्चतुर्भुजो नाम दशमः सर्गः ॥

